# श्री गणेश पूजा

Ganesha or Ganapati is an extremely popular God in India. He is called Vighneshvara or Vighnaharta, the Lord of and destroyer of obstacles. People mostly worship Him asking for siddhi, success in undertakings, and buddhi, intelligence. He is worshipped before any venture is started. He is also the God of education, knowledge and wisdom, literature, and the fine arts.

This puuja is commonly performed on Ganesh Chaturthi day ie. 4th day of bright half of moon in bhaadrapada month. Puja is done where possible at 1200hrs and morning 0600hrs or earlier. Night puja is visarjana puja where lord is kept for one day ( unless you keep the vigraha / idol for more than one day).

Check List

1. Altar, Deity (statue/photo), Ganesha Idol
2. Two big brass lamps (with wicks, oil/ghee)
3. Matchbox, Agarbatti
4. Karpoor, Gandha Powder, Kumkum, gopichandan, haldi
5. Sri Mudra (for Sandhyaavandan), Vessel for Tirtha, Yajnopaviita
6. Puujaa Conch, Bell, One aaratii (for Karpoor), Two Aaratiis with wicks
7. Flowers, Akshata (in a container), tulsi leaves
8. Decorated Copper or Silver Kalasha, Two pieces of cloth (new),
9. Coconut, 1/2 kg. Rice, Bananas 6, gold coin, gold chain
10. Extra Kalasha, 3 trays, 3 vessels for Abhisheka
11. Beetlenuts 6, Beetlenut Leaves 12, Banana Leaves 2, Mango Leaves 5-25
12. Dry Fruits, 5 bananas, 1 coconut - all for naivedya
13. Panchaamrita - Milk, Curd, Honey, Ghee, Sugar and Tender Coconut Water
14. Sri Ganesha ashTottara Book, Puja Book
15. Red flowers and red flower malas.
14. Modaka, Also fruits and prasad as far as possible 21 varieties.

Previous Night, think of the Lord Ganesha and mentally decide to perform puujaa the next day. This is the sankalpa. Next day early morning keep the same thoughts of worshipping the Lord and take a head-bath (if possible an oil-bath). Have some soothing Indian Music (Shehnai or sa.ntuur or sitaar or naadasvaram - preferably any instrumental) going on in the background till the puujaa begins. The music should be pleasing (not too loud) for creating a serene mood. (Of course people should be internally peaceful also!)

Wash Kalasha and fill it with clean water upto 3/4 of it. Cover and place it near the altar.
Observe Fast (if possible). Decorate the front door, altar and the place near the altar.
Invite your relatives, friends (who have bhakti in the Lord). Keep all the things for puujaa ready, near the altar.
Duration - start to aaratii - 2 hours

१ **At the regular Altar**

ॐ सर्वेभ्यो गुरुभ्यो नमः ।
ॐ सर्वेभ्यो देवेभ्यो नमः ।
ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः ॥
प्रारंभ कार्यं निर्विघ्नमस्तु । शुभं शोभनमस्तु ।
इष्ट देवता कुलदेवता सुप्रसन्ना वरदा भवतु ॥
अनुज्ञां देहि ॥

---

**At Shrii Ganesha Altar**
२ आचमनः

ॐ केशवाय स्वाहा ।
ॐ नारायणय स्वाहा ।
ॐ माधवाय स्वाहा ।
**(sip one spoon of water after each of the above three mantras)**

ॐ गोविंदाय नमः । ॐ विष्णवे नमः ।
ॐ मधुसूदनाय नमः । ॐ त्रिविक्रमाय नमः ।
ॐ वामनाय नमः । ॐ श्रीधराय नमः ।
ॐ हृषीकेशाय नमः । ॐ पद्मनाभाय नमः ।
ॐ दामोदराय नमः । ॐ संकर्षणाय नमः ।
ॐ वासुदेवाय नमः । ॐ प्रद्युम्नाय नमः ।
ॐ अनिरुद्धाय नमः । ॐ पुरुषोत्तमाय नमः ।
ॐ अधोक्षजाय नमः । ॐ नारसिंहाय नमः ।
ॐ अच्युताय नमः । ॐ जनार्दनाय नमः ।
ॐ उपेंद्राय नमः । ॐ हरये नमः ।

श्री कृष्णाय नमः ॥

---

३ प्राणायामः

ॐ प्रणवस्य परब्रह्म ऋषिः । परमात्मा देवता ।
दैवी गायत्री छन्दः । प्राणायामे विनियोगः ॥

ॐ भूः । ॐ भुवः । ॐ स्वः । ॐ महः ।
ॐ जनः । ॐ तपः । ॐ सत्यं ।
ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि
धियो यो नः प्रचोदयात् ॥

पुनराचमन
**(Repeat aachamana 2 - given above)**

ॐ आपोज्योति रसोमृतं ब्रह्म भूर्भुवस्सुवरोम् ॥

**(Apply water to eyes and understand that you are of the nature of Brahman)**

---

४ संकल्पः
**(Stand and hold a fruit in hand during sankalpa)**
ॐ श्रीमान् महागणाधिपतये नमः ।

श्री गुरुभ्यो नमः ।
श्री सरस्वत्यै नमः ।
श्री वेदाय नमः ।
श्री वेदपुरुषाय नमः ।
इष्टदेवताभ्यो नमः ।
कुलदेवताभ्यो नमः ।
स्थानदेवताभ्यो नमः ।
ग्रामदेवताभ्यो नमः ।
वास्तुदेवताभ्यो नमः ।
शचीपुरंदराभ्यां नमः ।
उमामहेश्वराभ्यां नमः ।
मातापितृभ्यां नमः ।
लक्ष्मीनारायणाभ्यां नमः ।

सर्वेभ्यो देवेभ्यो नमो नमः ।
सर्वेभ्यो ब्राह्मणेभ्यो नमो नमः ।
येतद्कर्मप्रधान देवताभ्यो नमो नमः ॥

॥ अविघ्नमस्तु ॥

शुक्लांबरधरं देवं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशांतये ॥

सर्वमंगल मांगल्ये शिवे सर्वार्थ साधिके ।
शरण्ये त्र्यंबके देवी नारायणी नमोऽस्तुते ॥

सर्वदा सर्व कार्येषु नास्ति तेषां अमंगलं ।
येषां हृदिस्थो भगवान् मंगलायतनो हरिः ॥

तदेव लग्नं सुदिनं तदेव ताराबलं चंद्रबलं तदेव ।
विद्या बलं दैवबलं तदेव लक्ष्मीपतेः तेंघ्रिऽयुगं स्मरामि ॥

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ।
येषां इन्दीवर श्यामो हृदयस्थो जनार्दनः ॥

विनायकं गुरुं भानुं ब्रह्माविष्णुमहेश्वरान् ।
सरस्वतीं प्रणम्यादौ सर्व कार्यार्थ सिद्धये ॥

श्रीमद् भगवतो महापुरुषस्य विष्णोराज्ञाय प्रवर्तमानस्य
अद्य ब्रह्मणोऽद्वितीय परार्धे विष्णुपदे श्री श्वेतवराह कल्पे
वैवस्वत मन्वन्तरे भारत वर्षे भरत खंडे जंबूद्वीपे
दण्डकारण्य देशे गोदावर्या दक्षिणे तीरे कृष्णवेण्यो उत्तरे
तीरे परशुराम क्षेत्रे (सम्युक्त अमेरिका देशे **St Lewis** ग्रामे
**or Australia** देशे **Victoria** ग्रामे **or Bahrain** देशे)
शालिवाहन शके वर्तमाने व्यवहारिके ईश्वर नाम संवत्सरे
दक्षिणायणे, भाद्रपद मासे, शुक्ल पक्षे चतुर्थ्याम् तिथौ,
अमुक नक्षत्रे शनि वासरे सर्व ग्रहेषु यथा राशि स्थान
स्थितेषु सत्सु येवं गुणविशेषेण विशिष्टायां शुभपुण्यतिथौ
मम आत्मन श्रुतिस्मृतिपुराणोक्त फलप्राप्यर्थं मम सकुटुम्बस्य
क्षेम स्थैर्य आयुरारोग्य चतुर्विध पुरुषार्थ सिध्यर्थं
अंगीकृत श्री गणेश व्रतांगत्वेन संपादित सामग्रय्या श्री
महा गणपति प्रीत्यर्थं यथा शक्त्या यथा मिलितोपचार द्रव्यैः
पुरुषसूक्त पुराणोक्त मन्त्रैश्च ध्यानावाहनादि षोडशोपचारे
श्री महा गणपति पूजनं करिष्ये ॥

इदं फलं मयादेव स्थापितं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेत् जन्मनिजन्मनि॥
**(keep fruits in front of the Lord)**

---

५ दिग्बन्धन
**( show mudras)**

ॐ भुर्भुवस्वरोम् इति दिग्बन्धः ।
**(snap fingers, circle head clockwise and clap hands)**
दिशो बद्नामि ॥
**(shut off all directions i.e. distractions**
**so that we can concentrate on the Lord)**

---

६ दीप स्थापना

अथ देवस्य वाम भागे दीप स्थापनं करिष्ये ।
अग्निनाग्नि समिध्यते कविर्ग्रहपतिर्युवा हव्यवात् जुवास्यः ॥
**(light the lamps)**

---

७ भूमि प्रार्थना
**(open palms and touch the ground)**
महिद्यौ पृथ्वीचन इमं यज्ञं मिमिक्षतां
पिप्रतान्नो भरीमभिः ॥

---

८ धान्य राशि

ॐ औषधय संवदंते सोमेन सहराज्ञ ।
यस्मै कृणेति ब्राह्मणस्थं राजन् पारयामसि ॥
**(Touch the grains/rice/wheat)**

---

९ कलश स्थापना

ॐ आ कलशेषु धावति पवित्रे परिसिंच्यते
उक्तैर्यज्ञेषु वर्धते ॥
**(keep kalasha on top of rice pile)**
ॐ इमं मे गङ्गे यमुने सरस्वती शुतुद्रिस्तोमं सचता परुष्ण्य ।
असिक्न्य मरुद्वृधे वितस्थयार्जीकीये श्रुणुह्या सुषोमय ॥
**(fill kalasha with water)**
ॐ गंधद्वारां धुरादर्शां नित्य पुष्पं करिषिर्णीं ।
ईश्वरिं सर्व भूतानां तामि होपह्वयेश्रियं ॥
**(sprinkle in/apply ga.ndha to kalasha)**
ॐ या फलिनीर्या अफला अपुष्पायाश्च पुष्पाणि ।
बृहस्पति प्रसोतास्थानो मंचत्वं हसः ॥
**(put beetle nut in kalasha)**
ॐ सहिरत्नानि दाशुषेसुवाति सविता भगः ।
तम्भागं चित्रमीमहे ॥
**(put jewels / washed coin in kalasha)**
ॐ हिरण्यरूपः हिरण्य सन्दृिग्पान्न पात्स्येदु हिरण्य वर्णः ।
हिरण्ययात्परियोनेर्निषद्या हिरण्यदाददत्थ्यन्नमस्मै ॥
**(put gold / daxina in kalasha)**
ॐ कान्डात् कान्डात् परोहंति परुषः परुषः परि एवानो दूर्वे
प्रतनु सहस्रेण शतेन च ॥
**(put duurva / karika )**
ॐ अश्वत्थेवो निशदनं पर्णेवो वसतिश्कृत ।
गो भाज इत्किला सथयत्स नवथ पूरुषं ॥
**(put five leaves in kalasha)**
ॐ युवासुवासः परीवीतागात् स उश्रेयान् भवति जायमानः ।
तं धीरासः कावयः उन्नयंति स्वाद्ध्यो स्वाद्ध्यो मनसा देवयंतः॥
**(tie cloth for kalasha)**
ॐ पूर्णादर्वि परापत सुपूर्णा पुनरापठ ।
वस्नेव विक्रीणावः इषमूर्जं शतकृतो ॥
**(copper plate and ashhTadala with ku.nkuM)**

इति कलशं प्रतिष्ठापयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

---

१० कलश पूजन
**(continue with second kalasha)**

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥
कुक्षौ तु सागराः सर्वे सप्त द्वीपा वसुंधराः ।
ऋग्वेदोऽयजुर्वेदः सामवेदोह्यथर्वणः ॥
अंगःश्च सहिताः सर्वे कलशंतु समाश्रिताः ।
अत्र गायत्री सावित्री शांति पुष्टिकरी तथा ॥

आयान्तु देव पूजार्थं अभिषेकार्थ सिद्धये ॥

ॐ सितासिते सरिते यत्र संगथे तत्राप्लुतासो दिवमुत्पतंति ।
ये वैतन्वं विस्रजन्ति धीरास्ते जनसो अमृतत्त्वं भजन्ति ॥

॥ कलशः प्रार्थनाः ॥

कलशः कीर्तिमायुष्यं प्रज्ञां मेधां श्रियं बलं ।
योग्यतां पापहानिं च पुण्यं वृद्धिं च साधयेत् ॥
सर्व तीर्थमयो यस्मात् सर्व देवमयो यतः ।
अथः हरिप्रियोसि त्वं पूर्णकुंभं नमोऽस्तुते ॥

कलशदेवताभ्यो नमः ।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

११ मुद्रा
**(Show mudras as you chant )**

1. Garuda's mudra:
interlock both little fingers (forms tail);
bring back of the knuckels together;
join the thumb (forms beak);
six fingers form the wings of garuda.

2 Dhenu mudra :(Kaama dhenu)
hold both hands together with fingers touching
each other forming a hollow and
four sets of fingers forming the nipples of udder of cow.

3 Shankh mudra:
All fingers of right hand push between the thumb
and the fore finger of left hand.
Other fingers of left hand grip the right hand
forming a shankha like mudra.

4 Chakra mudra:
Spread all fingers wide. bring the right hand on
top of left hand with palms touching each other,
and little finger of right hand touching the thumb
of left hand and vice versa. A chakra formation is shown.

5 Meru mudra:
clasp both hands interlocking all fingers in
between each other.
Open only middle fingers pointing down to earth.
a form of gadaa is shown.

निर्वीषि करणार्थे तार्क्ष मुद्रा । **(to remove poison)**
अमृति करणार्थे धेनु मुद्रा । **(to provide nectar )**
पवित्री करणार्थे शंख मुद्रा । **(to make auspicious)**
संरक्षणार्थे चक्र मुद्रा । **(to protect)**
विपुलमाया करणार्थे मेरु मुद्रा । **(to remove maayaa)**

---

१२ आत्मशुद्धि
**( Sprinkle water from sha.nkha
on puujaa items and devotees)**

अपवित्रो पवित्रो वा सर्व अवस्थांगतोपि वा ।
यः स्मरेत् पुंडरीकाक्षं सः बाह्याभ्यंतरः शुचिः ॥

---

१३ पञ्चामृत पूजा
**( put tulasi leaves or axataas in vessels )**

क्षीरे सोमाय नमः । **(keep milk in the centre)**
दधिनि वायवे नमः । **(curd facing east )**
घृते रवये नमः । **(Ghee to the south)**
मधुनि सवित्रे नमः । **( Honey to west )**
शर्करायां विश्वेभ्यो देवेभ्यो नमः । **( Sugar to north)**

---

१४ द्वारपालक पूजा

पूर्वद्वारे द्वारश्रिये नमः । इंद्राय नमः ।
दक्षिणद्वारे द्वारश्रिये नमः । गौरीपतये नमः ।
पश्चिमद्वारे द्वारश्रिये नमः । रत्न्ये नमः ।
उत्तरद्वारे द्वारश्रिये नमः । मन्यै नमः ।
यज्ञवरहाय नमः ।

मध्ये नव रत्नखचित दिव्य सिंहासनस्योपरि
श्री महा गणपतये नमः ॥
द्वारपालक पूजां समर्पयामि ॥

---

१५ पीठ पूजा

गं गणपतये नमः ।
दक्षिण दिशे सुं सरस्वत्यै नमः ।
उत्तर दिशे महालक्ष्म्यै नमः ।
वास्तुपुरुषाय नमः ।
गं गणपतये नमः ।
दं दुर्गायये नमः ।
प्रमोदायेय् नमः ।

अष्टदल पूजा

पूर्वदले विघ्नहर्त्रे नमः ।
आग्नेयदले प्रमोदिन्यै नमः ।

दक्षिणदले शंखनिधये नमः ।
नैरृत्यदले मदनमोहित्यै नमः ।
पश्चिमदले दुर्मुख मदनवत्यै नमः ।
वायव्यदले विधात द्राविण्ये नमः ।
उत्तरदले पद्मनिधये नमः ।
इशान्यदले सुमुखाय नमः ।

श्री महा गणपतये नमः । पीठ पूजां समर्पयामि ॥

---

१६ प्राण प्रतिष्ठा
**(hold flowers/axata in hand)**

**(hold flowers/axataa in hand)**
ॐ अस्य श्री महा गणपति प्राण प्रतिष्ठा महामंत्रस्य
ब्रह्मा विष्णु महेश्वरा ऋषयः ।
ऋग्यजुस्सामाथर्वाणि छन्दांसि ।
सकलजगत्सृष्टिस्थिति संहारकारिणी प्राणशक्तिः परा देवता ।
आं बीजम् । ह्रीं शक्तिः । क्रों कीलकम् ।
श्री महा गणपति प्राण प्रतिष्ठा सिद्ध्यर्थे जपे विनियोगः ॥

॥ करन्यासः ॥

आं अंगुष्ठाभ्यां नमः ॥
ह्रीं तर्जनीभ्यां नमः ॥
क्रों मध्यमाभ्यां नमः ॥
आं अनामिकाभ्यां नमः ॥
ह्रीं कनिष्ठिकाभ्यां नमः ॥
क्रों करतलकरपृष्ठाभ्यां नमः ॥

॥ अङ्गन्यासः ॥

आं हृदयाय नमः ॥
ह्रीं शिरसे स्वाहा ॥
क्रौं शिखायै वषट् ॥
आं कवचाय हुं ॥
ह्रीं नेत्रत्रयाय वौषट् ॥
क्रौं अस्त्राय फट् ॥

भूर्भुवस्वरों इति दिग्बन्धः ॥

॥ ध्यानम् ॥

रक्ताम्भोधिस्थ पोतोल्लसदरुण सरोजाधिरूढा कराब्जैः
पाशं कोदण्ड मिक्षुद्भवमळिगुण मप्यंकुशं पंचबाणान् ।
बिभ्राणासृक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या
देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥

लं पृथ्व्यात्मिकायै गन्धं समर्पयामि ।
हं आकाशात्मिकायै पुष्पैः पूजयामि ।
यं वाय्वात्मिकायै धूपमाघ्रापयामि ।
रं अग्न्यात्मिकायै दीपं दर्शयामि ।
वं अमृतात्मिकायै अमृत महानैवेद्यं निवेदयामि ।
सं सर्वात्मिकायै सर्वोपचारपूजां समर्पयामि ॥

आं, ह्रीं, क्रों, क्रों, ह्रीं, आं ।
य, र, ल, व, श, ष, स, ह, हों,
हंसस्सोहं सोऽहं हंसः ॥

श्री महा गणपति प्राणः मम प्राणः ।
श्री महा गनपति जीवः मम जीवः ।
वाग्मनः श्रोत्र जिह्वा घ्राणेः उच्च स्वरूपेण
बहिरागत्य अस्मिन् बिम्बे (अस्मिन् कलशे अस्मिन् प्रतिमायां)
सुखेन् चिरं तिष्ठन्तु स्वाहा ॥

अस्यां मूर्तौ जीवस्तिष्ठतु ।
अस्यां मूर्तौ सर्वेन्द्रियाणि मनस्त्वक्चक्षुः श्रोत्र जिह्वा
घ्राण वाक् पाणि पाद पायूपस्थाख्यानि
प्राण अपान व्यान उदान समानाश्चागत्य
सुखं चिरं तिष्ठन्तु स्वाहा ॥

असुनीते पुनरस्मासु चक्षुः पुनः प्राण मिह नो धेहि भोगम् ।
ज्योक् पश्येम सूर्य मुच्चरन्तमनुमते मृळया नस्स्वस्ति ॥

अमृतं वै प्राणः अमृतमापः प्राणानेव यथा स्थानं उपह्वयेत् ॥

स्वामिन् सर्व जगन्नाथ यावत् पूजावसानकम् ।
तावत्त्वं प्रीतिभावेन बिम्बेऽस्मिन् (कलशेस्मिन् प्रतिमायां )
सन्निधिं कुरु ॥

॥ महा गणपति न्यास ॥

ॐ गणानां त्वा इति मंत्रस्य घृत्समद ऋषिः ।
गणपतिर्देवता । जगति छंदः ।
महा गणपति न्यासे विनियोगः ॥

गणानांत्वेति अंगुष्ठाभ्यां नमः ।
गणपतिं हवामये इति तर्जनीभ्यां नमः ।
कविं कवीनां इति मध्यमाभ्यां नमः ।
उपवश्रवस्तम इति कनिष्ठिकाभ्यां नमः ।
आनः शृण्वन्नूतिभिः सीदसादनमिति करतलकरपृष्ठाभ्यां नमः ।

॥ एवं हृदयादि न्यासः ॥

ॐ भूर्भुवस्सुवरोम् ।इति दिग्बन्धः ।

गणानांत्वायै शिरसे स्वाहा ।
गणपतिमिति ललाटाय नमः ।
हवामहे इति मुखाय नमः ।
कविं कवीनामिति हृदयाय नमः ।
उपमश्रवस्तमम् इति नाभ्यै नमः ।
ज्येष्ठराज्य इति कठ्यै नमः ।
ब्रह्मणां इति ऊरुभ्यां नमः ।
ब्रह्मणस्पत इति जानुभ्यां नमः ।
आ नः शृण्वन् इति जठराभ्यां नमः ।
नूतिभिः इति गुल्फौभ्यां नमः ।
सीदसादनम् इति पादाभ्यां नमः ।

अस्य हेरंब न्यास महामंत्रस्य शुक्लार्क ऋषिः ।
हेरंबो देवता ।अनुष्टुप् छंदः ।
गं बीजं ।ॐ शक्तिः ।स्वाहा कीलकं ।
मम समस्त मनोरथ सिध्यर्थ सुमंगलमाप्तु
हेरंब न्यासं करिष्ये ॥

ॐ नमो हेरंबाय अंगुष्ठाभ्यां नमः ।
मदन मोहिताय तर्जनीभ्यां नमः ।
मम संकट मध्यमाभ्यां नमः ।
निवारणाय अनामिकाभ्यां नमः ।
हुं फट् कनिष्ठिकाभ्यां नमः ।
स्वाहा करतल पृष्ठाभ्यां नमः ।
क्लीं इति दिग्बन्धः ॥

**(offer the flowers, axatas and prayers)**

करिष्ये गणनाथस्य व्रतं संपत्करं शुभम् ।
भक्तानामिष्टवरदं सर्वमंगल कारणम् ॥

---

१७ ध्यानं

ॐ ॐ **(repeat 15 times)**
**Close eyes and bring Lord Ganesha's image in your mind and chant**
श्री गणेशाय नमः ।
श्री गणेशाय नमः ।
श्री गणेशाय नमः ।

विनायकं हेमवर्षं पाशांकुशधरं विभुं ।
दययोर् गजाननं देवं भालचंद्र समप्रभं ॥

ॐ सहस्रशीर्षा पुरुषः, सहस्राक्षः सहस्रपात् ।
सः भूमिं विश्वतो वृत्वा अत्यतिष्ठदशांगुलं ॥

श्री विनायकाय नमः ।ध्यानात् ध्यानं समर्पयामि ॥

---

१८ आवाहनं
**( hold flowers in hand)**

सिंदूरारुण कुंभं च कुंकुमांकित मालिनम् ।
सर्वविघ्नक्षयकारं सिद्धिदं सर्वकामदाम् ॥

पुरुष एवेदगं सर्वम् यद्भूतं यच्छ भव्यम् ।
उतामृतत्वस्येशानः यदन्नेनातिरोहति ॥

श्री विनायकाय नमः ।आवाहनं समर्पयामि ॥
**(offer flowers to Lord)** ।

आवाहितो भव ।स्थापितो भव ।सन्निहितो भव ।
सन्निरुद्धो भव ।अवकुण्ठितो भव ।सुप्रीतो भव ।
सुप्रसन्नो भव ।सुमुखो भव ।वरदो भव ।
प्रसीद प्रसीद ॥
**(show mudras to Lord)**

---

१९ आसनं

चतुर्भुजं महाकायं, पूर्ण चंद्र समप्रभं ।
एकदंतं शूर्पकर्णं, पूर्ण मोदक धारिणं ।

एतावानस्य महिमा अतो ज्यायागंश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥

श्री सिद्धि विनायकाय नमः ।आसनं समर्पयामि ॥
**(offer flowers/axathaas)**

---

२० पाद्यं
**(offer water)**

इन्द्रादि वंदितं देवं सिद्ध गंधर्व सेवितम् ।
पाद्यं गृहाण देवेश विनायक नमोऽस्तुते ॥

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवात्पुनः ।
ततो विश्वङ्व्यक्रामत् साशनानशने अभि ॥

श्री सिद्धि विनायकाय नमः ।पाद्यं समर्पयामि ॥

---

२१ अर्घ्यं

(offer water)

गजानन महाकाय, नागयज्ञोपवीतिणे ।
सूर्यकोटि प्रतिकाश गृहाणार्घ्यं नमोऽस्तुते ॥

तस्माद्विराडजायत विराजो अधि पूरुषः ।
स जातो अत्यतिच्यत पश्चाद्भूमितथो पुरः ॥

श्री उमासुताय नमः ।अर्घ्यं समर्पयामि ॥

---

२२ आचमनीयं
(offer water or axathaa/ leave/flower)

देवदेव नमस्तुभ्यं निर्विघ्नं गण नायक ।
गंगोदकं मयानीतं इदं आचमनं कुरु ॥

यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यम् ग्रीष्म इध्मश्शरद्धविः ॥

लंबोदराय नमः ।आचमनीयं समर्पयामि ॥

---

२३ स्नानं

ॐ श्री सिद्धि विनायकाय नमः ।मलापकर्श स्नानं
समर्पयामि ॥

---

२४ पञ्चामृत स्नानं
.१ पय स्नानं (milk bath)

ॐ आप्याय स्व स्वसमेतुते
विश्वतः सोमवृष्ण्यं भवावाजस्य सन्गधे ॥

सुरभेस्तु समुत्पन्नं देवानां अपि दुर्लभम् ।
पयो ददामि देवेश स्नानार्थं प्रतिगृह्यताम् ॥

ॐ श्री महा गणपतये नमः ।पयः स्नानं समर्पयामि ॥
पयः स्नानानंतर शुद्धोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

.२ दधि स्नानं (curd bath)

ॐ दधिक्रावणो अकारिषं जिष्णोरश्वस्यवाजिनः ।
सुरभिनो मुखाकरत् प्राण आयुंषितारिषत् ॥

चन्द्र मन्डल सम्काशं सर्व देव प्रियं हि यत् ।
दधि ददामि देवेश स्नानार्थं प्रतिगृह्यताम् ॥

ॐ श्री महा गणपतये नमः ।दधि स्नानं समर्पयामि ॥
दधि स्नानानंतर शुद्धोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

.३ घृत स्नानं (ghee bath)

ॐ घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतंवस्यधाम
अनुष्ठधमावह् मादयस्व स्वाहाकृतं वृषभ वक्षिहव्यं ॥

आज्यं सुरानां आहारं आज्यं यज्ञेय प्रतिष्ठितम् ।
आज्यं पवित्रं परमं स्नानार्थं प्रतिगृह्यता ॥

ॐ श्री महा गणपतये नमः ।घृत स्नानं समर्पयामि ॥
घृत स्नानानंतर शुद्धोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

.४ मधु स्नानं (honey bath)

ॐ मधुवाता ऋतायथे मधुक्षरंति सिन्धवः माध्विनः
संतोष्वधीः
मधुनक्त मुथोषसो मधुमत्वार्थिवं रजः मधुद्यौ रस्तुनः पित
मधुमान्नो वनस्पतिर्मधुमां अस्तु सूर्यः माध्वीर्गावो भवंतुनः ॥

सर्वौषधि समुत्पन्नं पीयुष सदृशं मधु ।
स्नानर्तन्ते मया दत्तं गृहाण परमेश्वर ॥

ॐ श्री महा गणपतये नमः ।मधु स्नानं समर्पयामि ॥
मधु स्नानानंतर शुद्धोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

.५ शर्करा स्नानं (sugar bath)

ॐ स्वादुः पवस्य दिव्याय जन्मने स्वादुदरिन्द्राय सुहवीतु नाम्ने ।
स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमा अदाभ्यः ॥

इक्षु दन्डात् समुत्पन्ना रस्यस्निग्ध तरा शुभा ।
शर्करेयं मया दत्ता स्नानार्थं प्रतिगृह्यताम् ॥

ॐ श्री महा गणपतये नमः ।शर्करा स्नानं समर्पयामि ॥
शर्करा स्नानानंतर शुद्धोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२५ गंधोदक स्नानं (Sandlewood water bath)

ॐ गंधद्वारां दुराधर्शां नित्य पुष्पां करीषिणीं ।

ईश्वरीं सर्व भूतानां तामि होप व्हयेश्रियं ॥

हरि चंदन संभूतं हरि प्रीतेश्च गौरवात् ।
सुरभि प्रिय गोविन्द गंध स्नानाय गृह्यतां ॥

ॐ श्री महा गणपतये नमः ।गंधोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२६ अभ्यंग स्नानं (**Perfumed Oil bath**)

ॐ कनिक्रदज्वनुशं प्रभ्रुवान।इयथिर्वाचमरितेव नावं ।
सुमंगलश्च शकुने भवासि मात्वा काचिदभिभाविश्व्या विदत ॥

अभ्यंगार्थं महीपाल तैलं पुष्पादि संभवं ।
सुगंध द्रव्य संमिश्रं संगृहाण जगत्पते ॥

ॐ श्री महा गणपतये नमः ।अभ्यंग स्नानं समर्पयामि।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२७ अंगोद्वर्तनकं (**To clean the body**)

अंगोद्वर्तनकं देव कस्तूर्यादि विमिश्रितं ।
लेपनार्थं गृहाणेदं हरिद्रा कुंकुमैर्युतं ॥

ॐ श्री महा गणपतये नमः ।अंगोद्वर्तनं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२८ उष्णोदक स्नानं (**Hot water bath**)

नाना तीर्थादाहृतं च तोयमुष्णं मयाकृतं ।
स्नानार्थं च प्रयश्चमे स्वीकुरुश्व दयानिधे ॥

ॐ श्री महा गणपतये नमः ।उष्णोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२९ शुद्धोदक स्नानं (**Pure water bath**)
**sprinkle water all around**

ॐ आपोहिष्टा मयो भुवः ।तान ऊर्जे दधातन ।
महेरणाय चक्षसे ।योवः शिवतमोरसः तस्यभाजयते हनः ।
उशतीरिव मातरः ।तस्मा अरंगमामवो ।यस्य क्षयाय जिंवध ।
आपोजन यथा चनः ॥

ॐ श्री महा गणपतये नमः ।शुद्धोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

**(after sprinkling water around throw one tulasi leaf to the north)**

---

३० महा अभिषेकः
**( Sound the bell pour water from kalasha)**

॥ पुरुष सूक्त ॥

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलम् ॥१॥
पुरुष एवेदगं सर्वम् यद्भूतं यच्छ भव्यम् ।
उतामृतत्वस्येशानः यदन्नेनातिरोहति ॥२॥
एतावानस्य महिमा अतो ज्यायागंश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥३॥
त्रिपादूर्ध्वं उदैत्पुरुषः पादोऽस्येहाभवात्पुनः ।
ततो विश्वङ्व्यक्रामत् साशनानशने अभि ॥४॥
तस्माद्विराडजायत विराजो अधि पूरुषः ।
स जातो अत्यतिच्यत पश्चाद्भूमितथो पुरः ॥५॥
यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यम् ग्रीष्म इध्मश्शरद्धविः ॥६॥
सप्तास्यासन् परिधयः त्रिस्सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वानाः अबध्नन्पुरुषं पशुम् ।
तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ॥७॥
तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम् ।
पशूगँस्तागंश्चक्रे वायव्यान् आरण्यान् ग्राम्याश्चये ॥८॥
तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे ।
छन्दाँगसि जज्ञिरे तस्मात् यजुस्तस्मादजायत ॥९॥
तस्मादश्वा अजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः ॥१०॥
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू कावूरू पादावुच्येते ॥११॥
ब्राह्मणोस्य मुखमासीत् बाहू राजन्यः कृतः ।
उरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥१२॥
चंद्रमा मनसो जातः चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ॥१३॥
नाभ्या आसीदन्तरिक्षम् शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकांग अकल्पयन् ॥१४॥
वेदाहमेतं पुरुषं महान्तम्
आदित्यवर्णं तमसस्तु पारे ।
सर्वाणि रूपाणि विचित्य धीरः
नामानि कृत्वाऽभिवदन् यदास्ते ॥१५॥
धाता पुरस्ताद्यमुदाजहार
शक्रः प्रविद्वान्प्रदिशश्चतस्त्रः ।
तमेवं विद्वानमृत इह भवति
नान्यः पन्था अयनाय विद्यते ॥१६॥

यज्ञेन यज्ञमयजन्त देवाः
तानि धर्माणि प्रथमान्यासन् ।
ते ह् नाकं महिमानः सचन्ते
यत्र पूर्वे साध्याः सन्ति देवाः ॥१७॥

ॐ श्री महा गणपतये नमः ।पुरुषसूक्त स्नानं समर्पयामि ॥
ॐ श्री महा गणपतये नमः ।महा अभिषेक स्नानं समर्पयामि ॥

---

३१ प्रतिष्ठापना

श्री महा गणपतये नमः ॥ **(Repeat 12 times)**

ॐ श्री गणेशाय सांगाय सपरिवाराय सायुधाय
सशक्तिकाय नमः ।
श्री गणेशं सांगं सपरिवारं सायुधं
सशक्तिकं आवाहयामि ॥
श्री महा गणपतये नमः ॥सुप्रतिष्ठमस्तु ॥

---

३२ वस्त्र
**(offer two pieces of cloth for the Lord)**

तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ॥

रक्तवर्णं वस्त्रयुग्मं देवानां च सुमंगलं ।
गृहाणेश्वर सर्वज्ञ लम्बोदर शिवात्मज ॥
ॐ श्री महा गणपतये नमः ।वस्त्रयुग्मं समर्पयामि ॥

---

३३ यज्ञोपवीत

तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम् ।
पशूँस्तागंश्चक्रे वायव्यान् आरण्यान् ग्राम्याश्चये ॥

दारनार्थं ब्रह्मसूत्र सौवर्णंछोतरीयकम् ॥
वक्रतुण्ड गृहाणेदं भक्तानां वरदायकम् ॥

ॐ वक्रतुन्दाय नमः ।यज्ञोपवीतं समर्पयामि ॥

---

३४ आभरणं

तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे ।
छन्दाँगसि जज्ञिरे तस्मात् यजुस्तस्मादजायत ॥

सुवर्णेन कृतं हारं, मौक्तिकैश्च सुशोभितं
भक्त्या समर्पितं तुभ्यं, भूषणं प्रतिगृह्यतां

गुणशालिने नमः ।सर्व आभरणानि समर्पयामि ॥

---

३५ गंध

तस्मादश्वा अजायन्त ये के चोभयादतः ।
गावो ह् जज्ञिरे तस्मात् तस्माज्जाता अजावयः ॥

गंधं गृहाण् देवेश दिव्य चंदन मिश्रितम् ।
कर्पूर कुंकुमायुक्तं उमापुत्र नमोऽस्तुते ॥

कपिलाय नमः ।गंधं समर्पयामि ॥

---

३६ अक्षत

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू कावूरू पादावुच्येते ॥

शालियां श्वेतवर्णाभ्यां रक्तचंदन मिश्रितं ।
अक्षतान् मयादत्तान् गृहाण सुरवन्दित ॥

विघ्नराजाय नमः ।अक्षतान् समर्पयामि ॥

---

३७ पुष्प

ब्राह्मणोस्य मुखमासीत् बाहू राजन्यः कृतः ।
उरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥

कमलोत्पल कलहार पुन्नाग ब्रहतीनि च
नाना विधानि दिव्याणि, पुष्पाणि प्रतिगृह्यतां

विकटाय नमः ।पुष्पाणि समर्पयामि ॥

---

३८ अथांगपूजा

गणाधिपतये नमः ।पादौ पूजयामि ॥
उमापुत्राय नमः ।गुल्फ़ौ पूजयामि ॥
अघनाशनाय नमः ।जानुनी पूजयामि ॥
विनायकाय नमः ।जंघे पूजयामि ॥
ईश पुत्राय नमः ।ऊरून् पूजयामि ॥
सर्वसिद्धिप्रदायकाय नमः ।कटिं पूजयामि ॥
एकदंताय नमः ।पृष्ठं पूजयामि ॥
गजाननाय नमः ।नाभिं पूजयामि ॥
सुमुखाय नमः ।वक्षस्थलं पूजयामि ॥
विकटाय नमः ।मुखं पूजयामि ॥
विघ्नराजाय नमः ।दंतन् पूजयामि ॥
हेरंबाय नमः ।नासिकान् पूजयामि ॥

सुरराजाय नमः । कर्णौ पूजयामि ॥
वातवे नमः । नेत्रं पूजयामि ॥
आखुवहनाय नमः । उदरं पूजयामि ॥
भालचंद्राय नमः । ललाटं पूजयामि ॥
द्वैमातुराय नमः । शिरः पूजयामि ॥
सुरार्चिताय नमः । सर्वांगाणि पूजयामि ॥

---

३९ अथ पुष्प पूजा

विघ्नराजाय नमः । मालति पुष्पं समर्पयामि ॥
लंबोदराय नमः । पुन्नाग पुष्पं समर्पयामि ॥
शिवाय नमः । बिल्व पुष्पं समर्पयामि ॥
वक्रतुण्डाय नमः । चंपक पुष्पं समर्पयामि ॥
शूर्पकर्णाय नमः । कपित्थ पुष्पं समर्पयामि ॥
कुब्जाय नमः । करवीर पुष्पं समर्पयामि ॥
गणेशाय नमः । अश्वतः पुष्पं समर्पयामि ॥
विघ्ननाशिने नमः । वकुल पुष्पं समर्पयामि ॥
विकटाय नमः । पारिजात पुष्पं समर्पयामि ॥
वामनाय नमः । कांचन पुष्पं समर्पयामि ॥
सर्व देवाधिदेवाय नमः । शतपत्र पुष्पं समर्पयामि ॥
विघ्नहर्त्रे नमः । गिरिकर्णिका पुष्पं समर्पयामि ॥
एकदंताय नमः । कलहार पुष्पं समर्पयामि ॥
कृष्णपिंगलाय नमः । पद्म पुष्पं समर्पयामि ॥
फालचंद्राय नमः । निंब पुष्पं समर्पयामि ॥
गजाननाय नमः । मालति पुष्पं समर्पयामि ॥
शंकरसूनवे नमः । पातली पुष्पं समर्पयामि ॥
चिंतामणये नमः । अर्क पुष्पं समर्पयामि ॥
श्री सिद्धि विनायकाय नमः । पुष्प पूजां समर्पयामि ॥

---

४० अथ पत्र पूजा

गणाधिपतये नमः । माचि पत्रं समर्पयामि ॥
उमापुत्राय नमः । भृंगराज पत्रं समर्पयामि ॥
गजाननाय नमः । बिल्व पत्रं समर्पयामि ॥
हरसूनवे नमः । दूर्वा पत्रं समर्पयामि ॥
इभवक्त्राय नमः । शमी पत्रं समर्पयामि ॥
विकटाय नमः । करवीर पत्रं समर्पयामि ॥
विनायकाय नमः । अश्वत्थ पत्रं समर्पयामि ॥
कपिलाय नमः । अर्क पत्रं समर्पयामि ॥
भावप्रियाय नमः । जंबू पत्रं समर्पयामि ॥
देवेशाय नमः । विष्णुक्रांति पत्रं समर्पयामि ॥
वातवे नमः । दाडिमा पत्रं समर्पयामि ॥
सुरपतये नमः । आम्र पत्रं समर्पयामि ॥
भालचंद्राय नमः । जम्बीर पत्रं समर्पयामि ॥
हेरंबाय नमः । श्वेतदूर्वा पत्रं समर्पयामि ॥
एकदंताय नमः । मल्लिका पत्रं समर्पयामि ॥
शूर्पकर्णये नमः । जाजी पत्रं समर्पयामि ॥
सुरराजाय नमः । मरुवक पत्रं समर्पयामि ॥
पाशांकुश धराय नमः । अपा-मार्ग पत्रं समर्पयामि ॥
सुमुखाय नमः । तुलसि पत्रं समर्पयामि ॥
गणाधिपतये नमः । ब्रहती पत्रं समर्पयामि ॥
श्री सिद्धि विनायकाय नमः । पत्रपूजां समर्पयामि ॥

---

४१ दूर्वा पूजा

गणाधिपतये नमः । दूर्वा युग्मं पूजयामि ॥
उमापुत्राय नमः । दूर्वा युग्मं पूजयामि ॥
एकदंताय नमः । दूर्वा युग्मं पूजयामि ॥
अघनाशिने नमः । दूर्वा युग्मं पूजयामि ॥
कुमारगुरवे नमः । दूर्वा युग्मं पूजयामि ॥
विघ्नराजाय नमः । दूर्वा युग्मं पूजयामि ॥
लंबोदराय नमः । दूर्वा युग्मं पूजयामि ॥
विकटाय नमः । दूर्वा युग्मं पूजयामि ॥
हेरंबाय नमः । दूर्वा युग्मं पूजयामि ॥
कपिलाय नमः । दूर्वा युग्मं पूजयामि ॥
भालचंद्राय नमः । दूर्वा युग्मं पूजयामि ॥
इभवक्त्राय नमः । दूर्वा युग्मं पूजयामि ॥
शूर्पकर्णाय नमः । दूर्वा युग्मं पूजयामि ॥
द्वैमातुराय नमः । दूर्वा युग्मं पूजयामि ॥
सुमुखाय नमः । दूर्वा युग्मं पूजयामि ॥
विघ्नराजाय नमः । दूर्वा युग्मं पूजयामि ॥
सुरराजाय नमः । दूर्वा युग्मं पूजयामि ॥
मूषकवाहनाय नमः । दूर्वा युग्मं पूजयामि ॥
सर्वसिद्धिप्रदायकाय नमः । दूर्वा युग्मं पूजयामि ॥
श्री सिद्धि विनायकाय नमः । दूर्वा पूजां समर्पयामि ॥

---

४२ षोडश नाम पूजा

ॐ सुमुखाय नमः ।
एकदन्ताय नमः ।
कपिलाय नमः ।
गजकर्णकाय नमः ।
लंबोदराय नमः ।
विकटाय नमः ।
विघ्नराजाय नमः ।
विनायकाय नमः ।
धूमकेतवे नमः ।
गणाध्यक्ष्याय नमः ।
भालचन्द्राय नमः ।
गजाननाय नमः ।
वक्रतुण्डाय नमः ।
शूर्पकर्णाय नमः ।

हेरंबाय नमः ।
स्कन्दपूर्वजाय नमः ।

ॐ श्री सिद्धिविनायकाय नमः ॥

४३ अष्टोत्तरशतनाम पूजा
**Chant Dhyaan Shlokas**
**to concentrate on the Lord**

ॐ वक्रतुण्ड महाकाय कोटि सूर्य समप्रभ ।
निर्विघ्नं कुरु मे देव सर्व कार्येषु सर्वदा ॥

ॐ विनायकाय नमः ।
विघ्नराजाय नमः ।
गौरीपुत्राय नमः ।
गणेश्वराय नमः ।
स्कन्दाग्रजाय नमः ।
अव्ययाय नमः ।
पूताय नमः ।
दक्षाध्यक्ष्याय नमः ।
द्विज प्रियाय नमः ।
अग्निगर्भच्छिदे नमः ।
इंद्रश्रीप्रदाय नमः ।
वाणीबलप्रदाय नमः ।
सर्वसिद्धिप्रदायकाय नमः ।
शर्वथनयाय नमः ।
गौरितनूजाय नमः ।
शर्वरीप्रियाय नमः ।
सर्वात्मकाय नमः ।
सृष्टिकर्त्रे नमः ।
देवानिकार्चिताय नमः ।
शिवाय नमः ।
शुद्धाय नमः ।
बुद्धिप्रियाय नमः ।
शांताय नमः ।
ब्रह्मचारिणे नमः ।
गजाननाय नमः ।
द्वैमातुराय नमः ।
मुनिस्तुत्याय नमः ।
भक्त विघ्न विनाशनाय नमः ।
एक दंताय नमः ।
चतुर्बाहवे नमः ।
शक्तिसंयुताय नमः ।
चतुराय नमः ।
लंबोदराय नमः ।
शूर्पकर्णाय नमः ।
हेरंबाय नमः ।
ब्रह्मवितमाय नमः ।
कालाय नमः ।
ग्रहपतये नमः ।
कामिने नमः ।
सोमसूर्याग्निलोचनाय नमः ।
पाशांकुशधराय नमः ।
छन्दाय नमः ।
गुणातीताय नमः ।
निरंजनाय नमः ।
अकल्मषाय नमः ।
स्वयंसिद्धार्चितपदाय नमः ।
बीजापुरकराय नमः ।
अव्यक्ताय नमः ।
गदिने नमः ।
वरदाय नमः ।
शाश्वताय नमः ।
कृतिने नमः ।
विद्वत्प्रियाय नमः ।
वीतभयाय नमः ।
चक्रिणे नमः ।
इक्षुचपध्रिते नमः ।
अब्जोत्फलकराय नमः ।
श्रीधाय नमः ।
श्रीहेतवे नमः ।
स्तुतिहर्षताय नमः ।
कलाद्भृते नमः ।
जटिने नमः ।
चन्द्रचूडाय नमः ।
अमरेश्वराय नमः ।
नागयज्ञोपवितिणे नमः ।
श्रीकांताय नमः ।
रामार्चितपदाय नमः ।
वृतीणे नमः ।
स्थूलकांताय नमः ।
त्रयीकर्त्रे नमः ।
संघोषप्रियाय नमः ।
पुरुषोत्तमाय नमः ।
स्थूलतुण्डाय नमः ।
अग्रजन्याय नमः ।
ग्रामण्ये नमः ।
गणपाय नमः ।
स्थिराय नमः ।
वृद्धिदाय नमः ।
सुभगाय नमः ।
शूराय नमः ।

वागीशाय नमः ।
सिद्धिदाय नमः ।
दुर्वाबिल्वप्रियाय नमः ।
कन्ताय नमः ।
पापहारिणे नमः ।
कृतगमाय नमः ।
समाहिताय नमः ।
वक्रतुण्डाय नमः ।
श्रीप्रदाय नमः ।
सौम्याय नमः ।
भक्ताकांक्षितदाय नमः ।
अच्युताय नमः ।
केवलाय नमः ।
सिद्धाय नमः ।
सच्चिदानंदविग्रहाय नमः ।
ज्ञानिने नमः ।
मयायुक्ताय नमः ।
दन्ताय नमः ।
ब्रह्मिष्ठाय नमः ।
भयावर्चिताय नमः ।
प्रमर्तदैत्यभयदाय नमः ।
व्यक्तमूर्तये नमः ।
अमूर्तये नमः ।
पार्वतिशंकरोत्संगखेलनोत्सवलालनाय नमः ।
समस्तजगदधाराय नमः ।
वरमूषकवाहनाय नमः ।
हृष्टस्तुताय नमः ।
प्रसन्नात्मने नमः ।
सर्वसिद्धिप्रदायकाय नमः ।

इति श्री सिद्धिविनायकाष्टोत्तरशतनामावलि सम्पूर्णम् ॥

---

४४ धूपं

दशांगं गुग्गुलं दिव्यमुत्तमं गण नायक ।
धूपं गृहाण देवेश गौरि पुत्र नमोऽस्तुते ॥

चंद्रमा मनसो जातः चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ॥

ॐ श्री महा गणपतये नमः । धूपं आघ्रापयामि ॥

---

४५ दीपं

सर्वज्ञ सर्व देवेश, सर्व सिद्धि प्रदायक ।
गृहाण मंगलं दीपं, रुद्र पुत्र नमोऽस्तुते ॥

नाभ्या आसीदन्तरिक्षम् शीर्ष्णो द्यौः समवर्तत ।
पदभ्यां भूमिर्दिशः श्रोत्रात् तथा लोकांग अकल्पयन् ॥

ॐ श्री महा गणपतये नमः । दीपं दर्शयामि ॥

---

४६ नैवेद्यं

**(dip finger in water and write a square and 'shrii' mark inside the square. Place naivedya on 'shrii'. remove lid and sprinkle water around the vessel; place in each food item one washed leaf or flower or akshata)**

ॐ तत्पुरुषय विद्महे वक्रतुण्डय धीमहि ।
तन्नो दन्तिः प्रचोदयात् ॥

ॐ श्री महा गणपतये नमः ॥

**(show mudras)**
निर्वीषिकरणार्थे तार्क्ष मुद्रा ।
अमृती करणार्थे धेनु मुद्रा ।
पवित्रीकरणार्थे शंख मुद्रा ।
संरक्षणार्थं चक्र मुद्रा ।
विपुलमाय करणार्थे मेरु मुद्रा ।

**Touch naivedya and chant 9 times 'ॐ'**

ॐ सत्यंतवर्तेन परिसिंचामि
**(sprinkle water around the naivedya)**

भोः! स्वामिन् भोजनार्थं आगश्चादि विज्ञाप्य ।
**(request Lord to come for dinner)**

अमृतोपस्तरणमसि स्वाहा ।
**(drop water from sha.nkha)**

अन्नं चतुर्विदं स्वाधु रसै शड्भि समंवितं ।
परमान्नं च मधुरं मोदकान् घृतमार्चितान् ।
नारिकेलं इक्षुकाण्डं रंभा फल समंवितं ॥
मोदकापूप लड्डुनि दधि क्षीरं च सद्ग्रतं
भक्ष्य भोज्यं च नैवेद्यं, प्रीत्यर्थं प्रतिगृह्यतां ॥

ॐ प्राणात्मने गजाननाय स्वाहा ।
ॐ आपानात्मने अग्रपूज्याय स्वाहा ।
ॐ व्यानात्मने विनायकाय स्वाहा ।

ॐ उदानात्मने हेरम्बाय स्वाहा ।
ॐ समानात्मने सुमुखाय स्वाहा ।

नैवेद्यं गृह्यतां देव भक्ति मे अचलां कुरुः ।
ईप्सितं मे वरं देहि इहत्र च परां गतिं ॥

वेदाहमेतं पुरुषं महान्तम्
आदित्यवर्णं तमसस्तु पारे ।
सर्वाणि रूपाणि विचित्य धीरः
नामानि कृत्वाऽभिवदन् यदास्ते ॥

श्री सिद्धि विनायकाय नमः । नैवेद्यं समर्पयामि ॥

**(cover face with cloth, and chant gaayatri ma.ntra five times )**
सर्वत्र अमृतोपिधान्यमसि स्वाहा ॥

---

४७ उत्तरापोषणं

गंगोदकं समानीतं कर्पूरगरु संयुतं ।
भक्त्यादत्तं गृहाणेदं विघ्न राजा नमोऽस्तुते ॥

मधे मध्ये पानीयं समर्पयामि ॥

ॐ श्री सिद्धि विनायकाय नमः । उत्तरापोषणं समर्पयामि ॥
**(Let flow water from sha.nkha)**

---

४८ पुनराचमनीयं

कर्पूर मिश्रितं तोयं कस्तूर्यादि समंवितम् ।
ग्रहाण विघ्न राजेंद्र करोद्वर्थनकं शुभम् ॥

---

४९ महा फलं
**(put tulsi / axathaa on a big fruit)**

इदं फलं मयादेव स्थापितं पुरतस्थव ।
तेन मय् सफलावाप्तिर्भवेत् जन्मनिजन्मनि ॥

ॐ श्री महा गणपतये नमः । महाफलं समर्पयामि ।

---

५० फलाष्टक
**(put tulsi/akshata on fruits)**

नारिकेलं च नारंग कदली मतुलुंगकं
इक्षु खण्डं गृहाणेश, प्रीत्यर्थं प्रतिगृह्यतां ॥
दाडिम्ब बदरी जंबू कपित्थं प्रभ्रतीनि च ।
द्राक्षा खर्जूर पनस फलानि प्रतिगृह्यताम् ॥

ॐ श्री महा गणपतये नमः । फलाष्टकं समर्पयामि ॥

---

५१ करोद्वर्तन

करोद्वर्तन्कं देवमया दत्तं हि भक्तिथः ।
चारु चंद्र प्रभां दिव्यं गृह्ण जगदीश्वर ॥

ॐ श्री महा गणपतये नमः ।
करोद्वर्तनार्थे चंदनं समर्पयामि ॥

---

५२ तांबूलं

पूगिफलं सतांबूलं नागवल्लि दलैर्युतम् ।
ताम्बूलं गृह्यतां देव येल लवंग सम्युक्तम् ॥

ॐ श्री महा गणपतये नमः । पूगिफल ताम्बूलं समर्पयामि ॥

---

५३ दक्षिणा

सौवर्णं रजतं चैव, निक्षिप्तं च तवाग्रथः ।
सुवर्ण पुष्पं देवेश सर्व विघ्न हरो भव ॥

ॐ श्री महा गणपतये नमः । सुवर्ण पुष्प दक्षिणां समर्पयामि ॥

---

५४ महा नीराजन

चन्द्रादित्यौ च धरणी, विद्युदग्निस्तथेव च ।
त्वमेव सर्व ज्योतींषि आर्थिक्यं प्रतिगृह्यतां ॥

श्री सिद्धि विनायकाय नमः । उत्तरनीराजनं समर्पयामि ।
ॐ श्री महा गणपतये नमः । महानीराजनं दीपं समर्पयामि ॥

---

५५ कर्पूर दीप

अर्चत प्रार्चत प्रिय मेघा सो अर्चत ।
अर्चन्तु पुत्र का उत् उर न धृष्ण वर्चत ॥

कर्पूरकं महाराज रंभोद्भूतं च दीपकं ।
मंगलार्थं महीपाल संगृहान जगत्पते ॥

ॐ श्री महा गणपतये नमः । कर्पूर दीपं समर्पयामि ॥

---

५६ आरती

Normally, the arati is done just after we chant

the slokas for mahaa niraajana and karpura deepa. All the devotees sing the arati bhajan, while one by one each person comes and gives arati. The arati plate normally has 5 small diyas (with cotton balls dipped in oil and with a fine tiri -end). Some kumukum and flowers should also be kept in the plate. The arati is done at the puja altar, accompanied by the ghanta (bell) and once everyone completes the arati, we take it to the regular altar (assuming these are different), show it there, come back and offer arati to the bell. We also offer kumkum and flowers to the bell, prostrate and then offer the arati to the devotees.

Here, all pujas are attended by minimum 40 to max 100+. So we have one or 2 aratis depending on the size of the crowd. Since this takes a lot of time, while the devotees offer the arati, the people who are doing the puja complete all other slokas upto the mantra pushpam. Once the arati is over we chant the mantra pushpam after which everybody offers akshata or flowers.

After the visarjana puja, we offer a karpura arati in a similar fashion.

॥ गणेश आरती ॥

जय गणेश जय गणेश जय गणेश देवा ।
माता जाकी पार्वती पिता महादेवा ॥

एकदंत दयावंत चार् भुजा धारी ।
माथे पर् तिलक् सोहे मूस की सवारी ।
पान् चढ़े फूल् चढ़े और् चढ़े मेवा ।
लड्डुअन् का भोग् लगे संत् करें सेवा ॥

अंधे को आँख् देत् कोढ़िन् को काया ।
बाँझन् को पुत्र देत् निर्धन् को माया ।
सूर् श्याम् शरण आये सफल् कीजे सेवा ।
जय गणेश जय गणेश जय गणेश देवा ॥

॥ ॐ जय जगदीश् हरे ॥

**you can add more aaratii songs as needed**

---

५७ प्रार्थना

नमस्ते देवदेवेश, भक्तानां अभयप्रद ।
विघ्नं नाशय कालेश हरात्मज नमोऽस्तुते ॥
प्रदक्षिणा त्रयं देव प्रयत्नेन मयाकृतं ।
दासों इति मां रक्ष नमस्ते भक्तवत्सल ॥
कृतं मे हर देवेश, शिव पुत्र नमोऽस्तुते ।
सिद्धिप्रद ममाप्यषु सर्वान् कामान् प्रपूरय ॥
त्वत् प्रसादेन सर्वाणि कार्याणि च करोम्यहं ।
शत्रुनां नाशनं चैव विघ्नानां ध्वंसनं कुरु ॥

इति प्रार्थनां समर्पयामि ॥

---

५८ प्रदक्षिणा

यानि कानि च पापानि जन्मांतर कृतानि च ।
तानि तानि विनश्यन्ति प्रदक्षिणे पदे पदे ॥

अन्यथा शरणं नास्ति त्वमेव् शरणं मम ।
तस्मात् कारुण्य भावेन रक्ष रक्ष गजानन ॥

श्री महा गणपतये नमः ।प्रदक्षिणान् समर्पयामि ॥

---

५९ नमस्कार
**(Try doing 21 namaskaaram chanting 21 names of mahaganapathi from ashhTottara; Caution: See that you are medically fit for this exersion; do not over exert under any circumstances)**

नमः सर्व हितार्थाय जगधार हेतवे ।
साष्टाङ्गोयं प्रणामस्ते प्रयत्नेन मया कृतः ।
ऊरूसा शिरसा दृष्ट्वा मनसा वाचसा तथा ।
पद्भ्यां कराभ्यां जानुभ्यां प्रणामोष्टाङ्गं उच्यते ॥

श्री महा गणपतये नमः ।नमस्कारान् समर्पयामि ॥

---

६० राजोपचार

गृहाण परमेशान सरत्ने छत्र चामरे ।
दर्पणं व्यञ्जनं चैव राजभोगाय यत्नथः ॥

श्री महा गणपतये नमः ।
छत्रं समर्पयामि ॥
चामरं समर्पयामि ॥
गीतं समर्पयामि ॥
नृत्यं समर्पयामि ॥
वाद्यं समर्पयामि ॥
दर्पणं समर्पयामि ॥
व्यञ्जनं समर्पयामि ॥
आन्दोलणं समर्पयामि ॥
राजोपचारान् समर्पयामि ॥

सर्वोपचारान् समर्पयामि ॥
समस्त राजोपचारार्थे अक्षतान् समर्पयामि ॥

---

६१ मंत्र पुष्प

यज्ञेन यज्ञमयजन्त देवाः तानि धर्माणि प्रथमान्यासन् ।
ते ह् नाकं महिमानः सचन्ते यत्र पूर्वे साध्याः सन्ति देवाः ॥

यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत् ॥

विद्या बुद्धि धनेश्वर्य पुत्र पौत्रादि संपदः ।
पुष्पांजलि प्रदानेन देहिमे ईप्सितं वरम् ॥

नमोऽस्त्वनंताय सहस्र मूर्तये सहस्र पादाक्षि शिरोरु बाहवे ।
सहस्र नाम्ने पुरुषाय शाश्वते सहस्र कोटी युगधारिणे नमः ॥

ॐ
नमो महद्भयो नमो अर्भकेभ्यो नाम्नो युवभ्यो नम आशिनेभ्यः ।
यजां देवान्य दिशक्रवा ममा जायसः शं समावृक्षिदेव ॥
ॐ ममत्तुनः परिज्ञावसरः ममत्तु वातो अपां वृषन्वान् ।
शिशीतमिन्द्रा पर्वता युवन्नस्थन्नो विश्वेवरिवस्यन्तु देवाः ॥
ॐ कथात अग्ने शुचीयंत अयोर्ददाशुर्वाजे भिराशुशानः ।
उभेयत्तोकेतनये दधाना ऋतस्य सामनृणयंत देवाः ॥

ॐ राजाधि राजाय प्रसह्य साहिने नमो वयं वैश्रवणाय
कूर्महे समे कामान् काम कामाय मह्यं कामेश्वरो
वैश्रवणो दधातु कुबेराय वैश्रवणाय महाराजाय नमः ॥

ॐ स्वस्ति साम्राज्यं भोज्यं स्वाराज्यं वैराज्यं
पारमेष्ठं राज्यं महाराज्यमाधिपत्यमयं समंत
पर्यायिस्यात् सार्व भौमः सार्वायुशः अंताद
परर्धत् पृथिव्यै समुद्र पर्यंतय एकरालिति तदप्येश
श्लोकोभिगीतो मरूतः परिवेष्टारो मरुत्तस्या वसन् ग्रिहे
आविक्षितास्य कामप्रेर्विश्वेदेवा सभासद इति ॥

श्री महा गणपतये नमः ।मंत्रपुष्पं समर्पयामि ॥

---

६२ शंख ब्रमण

**(make three rounds of sha.nkha with water like aarati and pour down;**
**chant OM 9 times and show mudras)**

इमां आपशिवतम इमं सर्वस्य भेषजे ।
इमां राष्ट्रस्य वर्धिनि इमां राष्ट्र भ्रतोमत ॥

---

६३ तीर्थ प्राशन

अकाल मृत्यु हरणं सर्व व्याधि निवारणं ।
सर्व पाप उपशमनं गणेश पादोदकं शुभम् ॥

---

६४ अर्घ्य प्रदानं

arghya pradaanam:
offering arghya by those who fasted and those who came late or those like ladies of the house who could not participate in the puujas because of other works, can now get full merit by offering arghya which is equivalent to whole puuja.

गौरी पुत्र नमस्तेस्तु सर्व सिद्धि विनायक ।
सर्व संकट नाशाय गृहाणार्घ्यं नमोऽस्तुते ॥
गौरि पुत्राय नमः ।प्रथमार्घ्यं समर्पयामि ॥

विनायक नमस्तुभ्यं सर्व काम्य फल प्रद ।
वांछितं देहि मे दत्तं गृहाणार्घ्यं नमोऽस्तुते ॥
विनायकाय नमः ।द्वितीयार्घ्यं समर्पयामि ॥

भालचंद्र नमस्तुभ्यं भक्तानां भद्रदायक ।
गंध पुष्प फलैर्युक्तं गृहाणार्घ्यं नमोऽस्तुते ॥
भालचंद्राय नमः ।तृतीय अर्ग्य्हं समर्पयामि ॥

तीर्थानां उत्तमं देवि गणेश प्रिय वल्लभे ।
सर्व संकट नाशार्थं चतुर्थार्घ्यं नमो ॥
लंबोदराय नमः ।चतुर्थ्यार्घ्यं समर्पयामि ॥

॥अथ चन्द्र अर्घ्यं ॥

नमः सोमाय देवाय द्विज राजाय पालिने ।
पाहि मां कृपया देव नक्षत्रेश नमोऽस्तुते ॥

क्षीरोदार्णव संभूत अत्रि नेत्र समुद्भव ।
गृहाणार्घ्यं मयादत्तं रोहिण्या सहित प्रभो ॥
सोमाय नमः ।प्रथमार्घ्यं समर्पयामि ॥

नमस्ते रोहिणीकांत भद्ररूप निशाकर ।
गृहाणार्घ्यं मयादत्तं रामानुज नमोऽस्तुते ॥
निशाकराय नमः ।द्वितीयार्घ्यं समर्पयामि ॥

संसार रूदो व्यथितम्हिमा,
सद संकष्टभूतं सुमुख प्रसीद
सत्त्वं हि मे नाशाय, कष्टसंघान् नमो नमः ।

कष्ट विनाशकाय नमः ।तृतीय अर्घ्यं समर्पयामि ॥

इति प्रार्थनां समर्पयामि ॥

---

६५ विसर्जन पूजा

आराधितानां देवतानां पुनः पूजां करिष्ये ॥
श्री महा गणपति देवताभ्यो नमः ॥

॥ पुनः पूजा ॥

ॐ महा गणपतये नमः । ध्यायामि।ध्यानं समर्पयामि ।
ॐ महा गणपतये नमः । आवाहयामि ।
ॐ महा गणपतये नमः । आसनं समर्पयामि ।
ॐ महा गणपतये नमः । पाद्यं समर्पयामि ।
ॐ महा गणपतये नमः । अर्घ्यं समर्पयामि ।
ॐ महा गणपतये नमः । आचमनीयं समर्पयामि ।
ॐ महा गणपतये नमः । पञ्चामृत स्नानं समर्पयामि ।
ॐ महा गणपतये नमः । महा अभिषेकं समर्पयामि ।
ॐ महा गणपतये नमः । वस्त्रयुग्मं समर्पयामि ।
ॐ महा गणपतये नमः । यज्ञोपवीतं समर्पयामि ।
ॐ महा गणपतये नमः । गन्धं समर्पयामि ।
ॐ महा गणपतये नमः । नाना परिमल द्रव्यं समर्पयामि ।
ॐ महा गणपतये नमः । हस्तभूषणं समर्पयामि ।
ॐ महा गणपतये नमः । अक्षतान् समर्पयामि ।
ॐ महा गणपतये नमः । पुष्पं समर्पयामि ।
ॐ महा गणपतये नमः । नाना अलंकारं समर्पयामि ।
ॐ महा गणपतये नमः । अंग पूजां समर्पयामि ।
ॐ महा गणपतये नमः । पुष्प पूजां समर्पयामि ।
ॐ महा गणपतये नमः । पत्र पूजां समर्पयामि ।
ॐ महा गणपतये नमः । नाम पूजां समर्पयामि ।
ॐ महा गणपतये नमः । अष्टोत्तर पूजां समर्पयामि ।
ॐ महा गणपतये नमः । धूपं आघ्रापयामि
ॐ महा गणपतये नमः । दीपं दर्शयामि
ॐ महा गणपतये नमः । नैवेद्यं समर्पयामि ।
ॐ महा गणपतये नमः । महाफलं समर्पयामि ।
ॐ महा गणपतये नमः । फलाष्टकं समर्पयामि ।
ॐ महा गणपतये नमः । करोद्वर्तनकं समर्पयामि ।
ॐ महा गणपतये नमः । ताम्बूलं समर्पयामि ।
ॐ महा गणपतये नमः । दक्षिणां समर्पयामि ।
ॐ महा गणपतये नमः । महानीराजनं समर्पयामि ।
ॐ महा गणपतये नमः । कर्पूरदीपं समर्पयामि ।
ॐ महा गणपतये नमः । प्रदक्षिणां समर्पयामि ।
ॐ महा गणपतये नमः । नमस्कारान् समर्पयामि ।
ॐ महा गणपतये नमः । राजोपचारं समर्पयामि ।
ॐ महा गणपतये नमः । मन्त्रपुष्पं समर्पयामि ।

पूजांते छत्रं समर्पयामि ।
चामरं समर्पयामि ।
नृत्यं समर्पयामि ।
गीतं समर्पयामि ।
वाद्यं समर्पयामि ।
आंदोलिकारोहणं समर्पयामि ।
अश्वारोहणं समर्पयामि ।
गजारोहणं समर्पयामि ।

श्री महा गणपति देवताभ्यो नमः ।
समस्त राजोपचार देवोपचार शक्त्युपचार भक्त्युपचार
पूजां समर्पयामि ॥

---

६६ आत्म समर्पण

यस्य स्मृत्या च नाम्नोक्त्या तपः पूजा क्रियादिशु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्देय् तं अच्युतम् ॥

मंत्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन ।
यत्पूजितं मया देव परिपूर्णं तथास्तु मे ॥

अनेन मया कृतेन श्री महा गणपति देवता
सुप्रीतो सुप्रसन्नो वरदो भवतु ।

मध्ये मन्त्र तन्त्र स्वर वर्ण न्यूनातिरिक्त लोप दोष
प्रायश्चित्तार्थं अच्युतानन्तगोविंद नामत्रय महामन्त्र
जपं करिष्ये ॥

ॐ अच्युताय नमः ।
ॐ अनंताय नमः ।
ॐ गोविंदाय नमः
ॐ अच्युताय नमः ।
ॐ अनंताय नमः ।
ॐ गोविंदाय नमः
ॐ अच्युताय नमः ।
ॐ अनंताय नमः ।
ॐ गोविंदाय नमः
अच्युतानंतगोविन्देभ्यो नमः ।

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ॥

नमस्करोमि ।

---

६७ प्रसाद गृहणं

श्री महा गणपति प्रसादं शिरसा गृह्णामि ॥

---

६८ क्षमापनं

अपराध सहस्राणि क्रियन्ते अहर्निशं मया ।
तानि सर्वाणि मे देव क्षमस्व पुरुषोत्तम ॥

गच्छ सत्त्वमुमापुत्र ममानुग्रह कारणात् ।
पूजितोसि मया भक्त्या गच्छ स्वस्थानकं प्रभो ॥

**(Shake the kalasha)**

॥ श्री कृष्णार्पणमस्तु ॥

---

Original transliteration by Sri S A Bhandarkar
converted to suit ITRANS encoding.
ProofReading Required
Last updated on **February 23, 1998**
Please send corrections to shree@usa.net